# भागीरथीगद्यम्

ओं नमो भगवते वासुदेवाय ।
श्रीशुक उवाच -
तत्र भगवतः साक्षाद्यज्ञलिङ्गस्य विष्णोर्विक्रमतो
वामपादाङ्गुष्ठनखनिर्भिन्नोर्ध्वाण्डकटाहविवरेणा-
न्तःप्रविष्टा या बाह्यजलधारा तच्चरणपङ्कजा-
वनेजनारुणकिञ्जल्कोपरञ्जिताखिलजगदघ-
मलापहोपस्पर्शनामला साक्षाद्भगवत्पदी-
त्यनुपलक्षितवचोऽभिधीयमानातिमहता
कालेन युगसहस्रोपलक्षणेन दिवो
मूर्धन्यवततार यत्तद्विष्णुपदमाहुः ॥ १॥

यत्र ह वाव वीरव्रत औत्तानपादिः परमभागवतो-
ऽस्मत्कुलदेवताचरणारविन्दोदकमिति यामनुसवन-
मुत्कृष्यमाणभगवद्भक्तियोगेन दृढं क्लिद्यमानान्तर्हृदय
औत्कण्ठ्यविवशामीलितलोचनयुगलकुड्मल-
विगलितामलबाष्पकलयाभिव्यज्यमानरोमपुलक-
कुलकोऽधुनापि परमादरेण शिरसा बिभर्ति ॥ २॥

ततः सप्तर्षयस्तत्प्रभावाभिज्ञा यां ननु तपस
आत्यन्तिकी सिद्धिरेतावती भगवति सर्वात्मनि
वासुदेवेऽनुपरतभक्तियोगलाभेनैवोपेक्षितान्या-
र्थात्मगतयो मुक्तिमिवागतां मुमुक्षव इव सबहुमान-
मद्यापि जटाजूटैरुद्वहन्ति ॥ ३॥

ततोऽनेकसहस्रकोटिविमानानीकसङ्कुलदेवयानेना-
वतरन्तीन्दुमण्डलमावार्य ब्रह्मसदने निपतति ॥ ४॥

तत्र चतुर्धा भिद्यमाना चतुर्भिर्नामभिश्चतुर्दिश-
मभिस्पन्दन्ती नदनदीपतिमेवाभिनिविशति
सीतालकनन्दा चक्षुर्भद्रेति ॥ ५॥

सीता तु ब्रह्मसदनात्केसराचलादि गिरिशिखरेभ्यो-
ऽधोऽधःप्रस्रवन्ती गन्धमादनमूर्धसु पतित्वान्तरेण
भद्राश्ववर्षं प्राच्यां दिशि क्षारसमुद्रमभिप्रविशति ॥ ६॥

एवं माल्यवच्छिखरान्निष्पतन्ती ततोऽनुपरतवेगा केतुमालमभिचक्षुः प्रतीच्यां दिशि सरित्पतिं प्रविशति ॥ ७॥

भद्रा चोत्तरतो मेरुशिरसो निपतिता गिरिशिखरा-द्गिरिशिखरमतिहाय शृङ्गवतः शृङ्गादवस्यन्दमाना उत्तरांस्तु कुरूनभित उदीच्यां दिशि जलधि-मभिप्रविशति ॥ ८॥

तथैवालकनन्दा दक्षिणेन ब्रह्मसदनाद्बहूनि गिरिकूटान्यतिक्रम्य हेमकूटाद्धैमकूटान्यति-रभसतररंहसा लुठयन्ती भारतमभिवर्षं दक्षिणस्यां दिशि जलधिमभिप्रविशति यस्यां स्नानार्थं चागच्छतः पुंसः पदे पदेऽश्वमेधराजसूयादीनां फलं न दुर्लभमिति ॥ ९॥

इति श्रीमद्भागवते पञ्चमस्कन्धे सप्तदशोऽध्यायान्तर्गतं भागीरथीगद्यं सम्पूर्णम् ।